# Madhyamakashastra Stuti

# મધ્યમકશાસ્ત્રસ્તુતિઃ

## Document Information

Text title : Madhyamakashastra Stuti

File name : madhyamakashAstrastutiH.itx

Category : misc, buddha, stuti

Location : doc_z_misc_general

Transliterated by : DSBC staff

Proofread by : Miroj Shakya

Acknowledge-Permission: Prof. Miroj Shakya, Text Nagarjuna Institute of Exact Methods, Digital Sanskrit Buddhist Canon Project, University of the West https://www.dsbcproject.org/

Latest update : March 8, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2025

*sanskritdocuments.org*

# મધ્યમકશાસ્ત્રસ્તુતિઃ

યદ્બુદ્ધૈરિહ શાસનં નવવિધં સૂત્રાદિ સઙ્કીર્તિતં
લોકાનાં ચરિતાનુરોધનિપુણં સત્યદ્વયાપાશ્રયમ્ ।
તસ્મિન્ રાગનિરાકૃતૌ નહિ કથા દ્વેષક્ષયે જાયતે
દ્વેષસ્યાપિ નિરાકૃતૌ નહિ કથા રાગક્ષયે જાયતે ॥ ૧॥

માનાદેરપિ યત્ ક્ષયાય વચનં નાન્યં મલં હન્તિ તત્
તસ્માદ્વ્યાપિતરં ન તત્ર ચ પુનસ્તાસ્તા મહાર્થાઃ કથાઃ ।
મા મોહસ્ય પરિક્ષયાય તુ કથા ક્લેશાનશેષાનસૌ
હન્યાન્મોહસમાશ્રિતા હિ સકલાઃ ક્લેશા જિનૈર્ભાષિતાઃ ॥ ૨॥

મોહસ્યાસ્ય પરિક્ષયાય ચ યતો દૃષ્ટાઃ પ્રતીત્યાદય-
સ્તત્ત્વં તત્ પ્રતિપદ્ય સૈવ સુગતૈઃ સઙ્કીર્તિતા મધ્યમા ।
કાયો ધર્મમયો મુનેઃ સ ચ યતઃ સા શૂન્યતેત્યુચ્યતે
બુદ્ધાનાં હૃદયં સ ચાપિ મહતી વિદ્યેતિ સઙ્કીર્ત્યતે ॥ ૩॥

યસ્માત્સર્વગુણાકરોઽયમુદિતો બુદ્ધૈરતસ્તત્કથા
શાસ્ત્રે મધ્યમકેઽથ વિસ્તરતરા મુખ્યાત્મના વર્ણિતા ।
કારુણ્યદ્રુતચેતસા પ્રવચનં બુદ્ધ્વા યથાવસ્થિતં
બુદ્ધાનાં તનયેન તેન સુધિયા નાગાર્જુનેનાદરાત્ ॥ ૪॥

ગમ્ભીરં જિનશાસનં ન હિ જનો યો વેત્તિ તત્સંવિદે
મૌનીન્દ્રાદ્ વચસઃ પૃથઙ્નિગદિતું વાઞ્છન્તિ તત્ત્વં ચ યે ।
અન્યે યેઽપિ કુબુદ્ધયઃ પ્રવચનં વ્યાચક્ષતે ચાન્યથા
તેષાં ચાપિ નિરાકૃતૌ કૃતમિદં શાસ્ત્રં હતાન્તર્દ્વયમ્ ॥ ૫॥

સ્પષ્ટં રાહુલભદ્રપાદસહિતો નાગાર્જુનો તન્મતં
દેવેનાપ્યનુગમ્યમાનવચનઃ કાલં ચિરં દિષ્ટવાન્ ।
તચ્છાસ્ત્રપ્રવિવેકનિશ્ચિતધિયસ્તીર્થ્યાન્ વિજિત્યાખિલાં-
સ્તચ્છિષ્યા અપિ શાસનં મુનિવરસ્યાદિષ્ટવન્તશ્ચિરમ્ ॥ ૬॥

આયાતાય શિરોઽર્થિન્ને કરુણયા પ્રોત્કૃત્ય દત્ત્વા શિરઃ
સંયાતે તુ સુખાવતીં જિનસુતે નાગાર્જુને તત્કૃતાઃ ।
ગ્રન્થાઃ શિષ્યગણાશ્ચ તેઽપિ બહુના કાલેન નાશં ગતાઃ
તત્ત્વાર્કેઽસ્તમિતેઽધુના ન હિ મતં સ્પષ્ટં તદસ્તિ ક્વચિત્ ॥ ૭॥

ઉત્પ્રેક્ષા રચિતાર્થમાત્રનિપુણે દુરઙ્ગતે સત્પથાદ્
ઉન્મત્તેઽથ નિપીય તર્કમદિરાં લોકેઽધુના ભૂયસા ।
સર્વજ્ઞોદિતતત્ત્વબોધરહિતે બૌદ્ધે મતે વ્યાકુલે
ધન્યોઽસૌ ક્ષણમપ્યપાસ્ય વિમતિં યઃ શૂન્યતાં ગાહતે ॥ ૮॥

ભીત્યા વસ્તુનિબન્ધનોપરચિતૈર્યઃ શાસ્ત્રપાશૈર્વૃત-
શ્ચિત્ત્વોત્પ્લુત્ય ચ યાતિ વસ્તુપરિખાં ચૈકો મૃગોઽસૌ મહાન્ ।
તં પ્રત્યદ્ય ન ચિન્તયા મમ ગુણશ્ચૈકસ્તુ યો નાધુના
તં પ્રત્યેવ તદન્યશાસ્ત્રમથની વૃત્તિઃ કૃતેયં મયા ॥ ૯॥

દૃષ્ટ્વા સૂત્રસમુચ્ચયં પરિકથાં રત્નાવલીં સંસ્તુતી-
રભ્યસ્યાતિચિરં ચ શાસ્ત્રગદિતાસ્તાઃ કારિકા યત્નતઃ ।
યુક્ત્યાખ્યામથ ષષ્ટિકાં સવિડલાં તાં શૂન્યતાસપ્તતિં
યા ચાસાવથ વિગ્રહસ્ય રચિતા વ્યાવર્તિની તામપિ ॥ ૧૦॥

દૃષ્ટ્વા તચ્છતકાદિકં બહુવિધં સૂત્રં ગભીરં તથા
વૃત્તિં ચાપ્યથ બુદ્ધપાલિતકૃતાં સૂક્ષ્માં ચ યદ્ભાવિના ।
પારમ્પર્યસમાગતં પ્રવિચયાચ્ચાસાદિતં યન્મયા
પિણ્ડીકૃત્ય તદેતદુન્નતધિયાં તુષ્ટૌ સમાવેદિતમ્ ॥ ૧૧॥

ચિન્તામણ્ડલ એષ તર્કમથનઃ સાક્ષાદિહાવસ્થિતાન્
અર્થાન્ સમ્યગનાકુલાન્ પટુધિયાં વાગાંશુભિર્ભાસયન્ ।
વૃત્તિં સ્પષ્ટતરામિમાં ચ વિદધચ્ચન્દ્રોઽધુના કીર્તિમાન્
લોકાનામુદિતો નિહન્તિ વિમતીઃ સાન્દ્રાન્ધકારૈઃ સહ ॥ ૧૨॥

કૃત્વા વૃત્તિમિમામનાકુલપદાં સત્પ્રક્રિયામાદરાત્
શ્રાદ્ધાનાં સુધિયાં ન નિશ્ચયવિધૌ યુક્ત્યાગમાપાશ્રયામ્ ।
યત્પુણ્યં મમ શૂન્યતેવ વિપુલં તેનૈવ લોકોઽખિલ-
સ્ત્યક્ત્વા દૃષ્ટિગણં પ્રયાતુ પદવીં સર્વપ્રપઞ્ચચ્છિદામ્ ॥ ૧૩॥

શાસ્તારં પ્રણિપત્ય ગૌતમમહં તદ્ધર્મતાવસ્થિતાન્

સમ્બુદ્ધાન્ સકલં જિનાત્મજગણં ધર્મં ચ તૈર્ભાષિતમ્ ।
ચક્ષુર્ભૂતમનન્તબુદ્ધવચનસ્યાલોચને દેહિનાં
યોઽમું મધ્યમકં ચકાર કૃપયા નાગાર્જુનસ્તં નમે ॥ ૧૪॥

ઇતિ શ્રી આચાર્યચન્દ્રકીર્તિકૃતા મધ્યમકશાસ્ત્રસ્તુતિઃ સમાપ્તા ॥

---

*Madhyamakashastra Stuti*

pdf was typeset on March 8, 2025

Please send corrections to *sanskrit@cheerful.com*